अस्मिन् प्रश्नपत्रे **37** प्रश्नाः **8** मुद्रित पृष्ठाः च सन्ति ।

**अनुक्रमाङ्कः अङ्केषु** | | | | | | | | | | | |

**कूट सं. 40/S/A/S**

# संस्कृतम्
# (209)

परीक्षादिवसः दिनाङ्कश्च ..............................

निरीक्षकहस्ताक्षरद्वयम् 1. ..............................

2. ..............................

..............................

**सामान्य अनुदेशाः —**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।
2. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति । प्रश्नाः क्रमानुसारमेव सन्ति ।
3. वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथकरूपेण प्रदत्ते उत्तर-पुस्तिकामध्ये लिखेत् ।
4. वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।
5. उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।
6. स्व-उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या 40/S/A/S अवश्यं लेखनीया ।

P.T.O.

# संस्कृतम्
# (209)

**समय : होरात्रयम्** **पूर्णाङ्काः : 100**

**निर्देशाः :–** 1. अस्मिन् प्रश्नपत्रे **सप्तत्रिंशत्** प्रश्नाः सन्ति ।

2. प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

3. **सर्वे** प्रश्नाः अनिवार्याः ।

**1.** 'प्रेरणा' इति पाठानुसारं लिखत यत् बोपदेवः कस्यां सफलः न अभवत् ? 1

(A) गणिते (B) परीक्षायाम्

(C) क्रीडायाम् (D) सङ्गीते

**2.** 'अपृच्छत्' इति स्थाने भविष्यत्काले किं भविष्यति ? 1

(A) प्रक्ष्यति (B) पृच्छतु

(C) अपृच्छन् (D) प्रक्ष्यामि

**3.** किम् एति च याति च ? 1

(A) विद्या (B) धर्मः

(C) वृत्तम् (D) वित्तम्

**4.** उपवासं कृत्वा जीवनं त्यजामि इति कः कम् प्रति कथयति ? 1

(A) वानरः मकरं प्रति (B) मकरी वानरं प्रति

(C) मकरी मकरं प्रति (D) मकरः मकरीं प्रति

5. ‘अद्य मम गृहे तव भोजनम् अस्ति’ इति वाक्ये किम् अव्ययपदम् ? 1

(A) अद्य (B) मम

(C) तव (D) गृहे

6. कस्मिन् पदे षष्ठी बहुवचनम् अस्ति ? 1

(A) पुंसाम् (B) भूमेः

(C) आतुरस्य (D) सतः

7. आकाशात् उच्चतरः कः ? 1

(A) माता (B) पिता

(C) गुरुः (D) सार्थः

8. कीदृशं वाक्यं वाङ्मयं तपः उच्यते ? 1

(A) अनुद्वेगकरम् (B) सत्यम्

(C) प्रियहितम् (D) क्रूरम्

9. आर्यभटीयम् इति ग्रन्थे केषां विषयाणां चर्चा अस्ति ? **चत्वारः** विषयाः लिखत । 2

10. चन्दनविटपः विधिना कैः विवर्जितः विहितः तथापि सः केन परेषां सन्तापम् अपहरति ? 1+1

11. 'आ + गम् + ल्यप्' इति योजयित्वा किं पदं भविष्यति ? 1+1

12. द्वावेतौ सुखमेधेते, यद्भविष्यो विनश्यति इति अत्र कौ **द्वौ** सुखं प्राप्नुतः कश्च विनश्यति ? 1+1

13. 'धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्' इति पंक्तौ 'बुद्धिः' 'क्रोधस्य अभावः' इति कयोः पदयोः अर्थः ? 1+1

14. वृद्धः, वृकोदरः इति पद**द्वयं** सम्बोधने एकवचने किं भविष्यति ? 1+1

15. रिक्तस्थानं पूरयत : 1+1

केशवदासं आश्रमपदद्वारमात्रं ...................... (त्यज् + क्त्वा) सम्भावयिष्यामः । (............ सर्व प्रथमा ब. व. पुं.) निष्क्रान्ताः ।

16. भारते निर्मितस्य उपग्रहस्य नाम 'भास्कर' इति कस्य विदुषः सम्माने कृतम् ? तेन कः ग्रन्थः रचितः ? 1+1

17. चित्रकूटे कः कं प्रसादयितुं समागतः ? 1+1

18. 'सम्प्रति विश्रामं कुरु' इति वाक्यं वर्तमानकाले किं भविष्यति ? 1+1

**19.** प्रश्नान् उत्तरत : 1+1+1

(*i*) सीमन्तिनीषु का शान्ता ?

(*ii*) राजा कोऽभूद् गुणोत्तमः ?

(*iii*) विद्वद्भिः का सदा वन्द्या ?

**20.** यावत् शक्रः अग्रे सरति तावत् सः रथस्य अग्रे आगतानि कानि पश्यति ? तदा तान् दृष्ट्वा शक्रः मातलिं किम् आदिशति किमर्थञ्च ? 'करुणापरा हि साधवः' इति पाठम् आधृत्य उत्तरत । 1+1+1

**21.** पद्यं पठित्वा प्रश्नान् उत्तरत : 1+2

शरीरायासजननं कर्म व्यायाम उच्यते ।
लाघवं कर्मसामर्थ्यं दीप्ताऽग्निर्मेदसः क्षयः ॥

(*i*) व्यायामः कीदृशं कर्म उच्यते ?

(*ii*) व्यायामस्य लाभ**द्वयं** वर्णयत ।

**22.** "स च यावत् पश्यति तावत् सिंहपद्धतिः गुहायां प्रविष्टा न च निष्क्रमणं गता ।" इति पंक्तौ कः कस्य पदचिह्नानि पश्यति किं च तत्र वैशिष्ट्यम् अगृहीत् ? 'अनागतं यः कुरुते स शोभते' इति पाठम् आधृत्य उत्तरत । 1×3

**23.** पद्यं पठित्वा प्रश्नान् उत्तरत : 1×3

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥

(*i*) सरलता इति कस्य पदस्य अर्थः ?

(*ii*) केषां पूजनं शारीरं तप उच्यते ?

**24.** 'आदिशङ्कराचार्यः' इति पाठे 'मातः ! यदि संन्यासदीक्षायै भवत्याः स्वीकृतिः भवेत् तर्हि मम मुक्तिः स्यात्' इति कः कथयति ? 'मातः' इति सम्बोधनं कस्यै प्रयुक्तम् ? किमर्थं स्वीकृतिः वाञ्छ्यते ? 1×3

**25.** 'तेजसां हि न वपः समीक्ष्यते' इति पाठे 'साधु राजपुत्र ! साधु । सत्यमैक्ष्वाकः असि । इति कः कं प्रति कथयति ? ऐक्ष्वाकः इति पदस्य कः अर्थः ? 1×3

**26.** अधोलिखितस्य पद्यस्य प्रदत्ते अन्वये रिक्तस्थानानि पूरयत : 1×3

**पद्यांश :**

स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव ।
पुनर्ददताऽघ्नता जानता संगमेमहि ॥

अन्वयः = सूर्याचन्द्रमसौ ............*(i)*................ स्वस्ति पन्थाम् ..............*(ii)*............ । पुनः ददता ..............*(iii)*.............. जानता संगमेमहि ।

**27.** यथा यथा मनुष्याणां ज्ञानगाम्भीर्यं वर्धते तथा तथा किं वृद्धिम् आप्नुयात् ? विषयमपि कृत्यं केन क्षणेन सिध्यति ? कीदृशिं कुसुमानि चित्तम् आकर्षयन्ति ? 'दर्पः मूलमनर्थानाम्' इति पाठम् आश्रित्य उत्तरत । 1×3

**28.** 'पुत्रोऽहं पृथिव्याः' इति पाठम् आधृत्य उत्तरत—

सर्वप्राणिनां जीवनं केषु निर्भरम् ? अतः अस्माभिः जलस्य रक्षणार्थं किं किं करणीयम् ? 1×3

29. ‘अजलं स्नानम्’ इति पाठम् आधृत्य उत्तरत—

वडवानलः कुत्र भवति केन च प्रचण्डः भवति ? सामान्यतया जलं किं करोति ? 1×3

30. ‘‘प्रतिभावांश्च मेधावी नेतृत्वेन समन्वितः ।

लोकमान्येति विख्यातो मान्यो मान्यवरेषु च ॥’’

—इति पद्यं पठित्वा लोकमान्यतिलकस्य **त्रीन्** गुणान् लिखत । 1×3

31. ‘को नु खल्वेष मे वस्त्रे सज्जते ?’ इति का कथयति ? कः नु खलु वस्त्रे सज्जते किमर्थं च ? 1×3

32. ‘यस्यान्नतोयैः परिवर्धितोऽहं,

यत्पुण्यभूमौ विहरामि नित्यम्’

—इति पद्यांशं पठित्वा लिखत—भवान्/भवती केन केन परिवर्धितः/परिवर्धिता ? कुत्र च विहारः क्रियते ? 1×3

33. ‘साहसे श्रीः प्रतिवसति’ इति पाठे वेतालः कथं शापमुक्तः भवति इति **षड्**वाक्येषु वर्णयत । 1×6

34. ‘तेजसां हि न वपः समीक्ष्यते’ इति पाठम् आश्रित्य चन्द्रकेतोः चरित्रचित्रणं **षड्**वाक्येषु कुरुत । 1×6

**35.** कस्यचि**देकस्य** पाठस्य सारः **षड्**वाक्येषु लिखत : 1×6

(क) प्रेरणा

(ख) प्राणस्य श्रेष्ठत्वम्

(ग) यद्भविष्यो विनश्यति ।

**36.** **एकम्** विषयमधिकृत्य एकम् अनुच्छेदं **षड्**वाक्येषु लिखत : 1×6

(क) मम माता ।

(ख) अस्माकं देशः ।

(ग) वर्षा ऋतुः ।

**37.** स्वमित्रं संस्कृतं पठितुं प्रेरणार्थं एकं पत्रं लिखत । 1×6

**अथवा**

अनुजं प्रति स्वास्थ्यरक्षार्थं एकं पत्रं लिखत ।